# संस्कृतवार्ता:

दिनाङ्क :-08.10.2024

सायं - 06:20

<u>मुख्यवार्ताः</u>

- हरियाणा जम्मू-कश्मीरयोः विधानसभा-निर्वाचनस्य मतगणना अनुवर्तमाना अस्ति परिणामश्च सायं यावत् धोषयिष्यते।
- राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य नवदिल्ल्यां द्वाविंशत्यधिक-द्विसहस्रतम-वर्षस्य सप्तति-तमं राष्ट्रिय-चलच्चित्र-पुरस्कारान् प्रदत्तवती।
- भौतिक-विज्ञानाय ऐषमः नोबेल-पुरस्कारः जॉन एच. होपफील्ड अथ जेफ्री ई. हिंटन इत्येताभ्यां प्रदास्यते।
- देशे अद्य वायु-सेना-दिवसः आमान्यते। अस्मिन् अवसरे श्रीमोदिना उक्तं यत् वायुसेना तस्याः पराक्रम-दक्षताभ्यां प्रशंस्यते।
- महिलानां विंशतिं प्रतिविंशतिः विश्वचषक-क्रिकेट्-क्रीडायाम् ऑस्ट्रेलिया-देशः अद्य सायङ्काले शारजाह-नगरे न्यूजीलैण्ड-देशेन सह क्रीडति।

## <u>अथ वार्ताः विस्तरेण</u>

<u>मतगणना</u>

जम्मू-कश्मीर-हरियाणा-राज्ययोः विधान-सभानिर्वाचनस्य मतगणना प्रचलति। अन्तिम सूचना प्राप्तिं यावत् नवतिः सदस्यात्मिकायां जम्मू-कश्मीर-विधान-सभायां नशेनल-कॉंफ्रेंस्-काङ्ग्रेस-दलयोः संयुतिः अग्रणी अस्ति। तत्रैव नवतिः सदस्यात्मिकायां हरियाणा-विधान-सभायां भारतीय-जनता-पार्टीति दलम् अग्रे अस्ति । नवीनतमप्राप्त सूचनानुसारं जम्मू-कश्मीरे अद्यावधि नवतिः आसनानां परिणामाः घोषिताः सन्ति।

नैशनल कॉन्फ्रेंस दलम् द्वि-चत्वारिंशत् आसनानि, भारतीय जनता पार्टीति दलम् ऊनत्रिंशत् आसनानि, भारतीय राष्ट्रियकाङ्ग्रेसदलेन षड् आसनानि, जम्मू-कश्मीर पीपुल्स डेमोक्रेटिक पार्टीतिदलं त्रिणी आसनानि, जम्मू-कश्मीर पीपल्स कॉन्फ्रेंस दलेन, भारतीय साम्यवादी (मार्क्सवादी)दलेन आम आदमी पार्टीति दलेन च एकैकासनेषु विजयं सम्प्राप्तम्। निर्दलीय प्रत्यासिनः सप्त आसनानि विजितवन्तः।

पूर्वमुख्यमन्त्री नैशनलकॉन्फ्रेंस दलस्य नेता च उमर अब्दुल्ला बड़गाम-आसनात् विजयं प्राप्तवान्, गंदेरबल-आसनात् च अग्रणीः अस्ति । अनन्तनाग आसनात् काङ्ग्रेसदलस्य पीरजादा मोहम्मद सैय्यदः विजितवान्। नैशनल-

कॉन्फ्रेंस-दलस्य अब्दुल मजीद भटः पश्चिमी अनंत-नागे विजयं प्राप्तवान्। जम्मू-कश्मीर पीपल्स-कॉन्फ्रेंस इति दलस्य सज्जाद गनी लोनः हंदवाड़ा आसने विजयं प्राप्तम्। कुलगाम-नगरे सी.पी.आई.एम्.-दलस्य मोहम्मद-यूसुफ-तारिगामी अग्रे अस्ति। डूरु आसनात् वरिष्ठः काङ्ग्रेस-नेता गुलाम मोहम्मदमीरः विजयी अभवत्।

नैशनल कॉन्फ्रेंसदलस्य डॉ. बशीर अहमद वीरी इत्यनेन अनन्त-नाग-मण्डलस्य श्रीगुफवाड़ा-बिजबेहरा आसने पीडीपी प्रमुखायाः महबूबा मुफ्ती इत्यस्याः पुत्री इल्तिजा मुफ्ती इत्यमुं पराजिता। जम्मू-कश्मीरस्य नवति निर्वाचनक्षेत्रेषु मतदानं चरणत्रये सेप्टेम्बर्-मासस्य अष्टादश, पञ्चविंशतिः दिनाङ्कयोः अपि च अस्मिन् मासे प्रथमे दिनाङ्के च अभवत् ।

हरियाणायां सम्प्रत्यावत् ऊनाशीतिः आसनानां परिणामाः घोषिताः सन्ति। भाजपेति दलेन एकाचत्वारिंशत् आसनेषु विजयः प्राप्तः। सप्तासनेषु च अग्रे अस्ति। काङ्ग्रेस-दलेन त्रयस्त्रिंशत् आसनेषु विजयः प्राप्तः। चतुर्षु आसनेसु च अग्रे अस्ति। भारतीय राष्ट्रीय लोकदलेन द्वे आसने विजिते। अवधेयं वर्तते यत् नवतिः सदस्यानां हरियाणा विधानसभायाः मतदानं अक्टोबर् मासस्य पञ्चमे दिनाङ्के अभवत्।

<u>राष्ट्रियचलच्चित्र-पुरस्कारः</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अद्य नवदिल्ल्यां द्वाविंशत्यधिक-द्वि-सहस्र-तम-वर्षस्य सप्ततितमं राष्ट्रिय-चलच्चित्र-पुरस्कारान् प्रदत्तवती। अत्रावसरे सूचना प्रसारण मंत्री अश्विनी वैष्णवः सूचना प्रसारण राज्यमंत्री डॉ. एल. मुरूगनः चापि उपस्थितौ आस्ताम्। स्वागतोद्बोधने सूचना प्रसारण सचिवः सञ्जय जाजू अवोचत् यत् द्वा - विंशत्युत्तर – द्विसहस्रतम - वर्षाय मन्त्रालयेन फीचर -फिल्म-इत्यस्यां श्रेण्याम् नवोत्तर -त्रिशतम् नॉन - फीचर - फिल्म-इत्यस्यां श्रेण्यां च सप्तदश भाषाणाम् अष्टविंशतिः उत्तरैक-शतं चलचित्राणम् नामाङ्कनं प्राप्तम्। अत्रावसरे प्रख्यातः अभिनेता मिथुनचक्रवर्ती चलच्चित्रक्षेत्रे सर्वोच्च-सम्मानेन दादा-साहब-फाल्के-पुरस्कारेण सम्मानितः। ऋषभ-शेट्टी- इत्येषः कन्तारा-चलचित्राय सर्वश्रेष्ठ-अभिनेतुः पुरस्कारेण सम्मानं प्राप्नोत्। सर्वश्रेष्ठ-अभिनेत्र्याः पुरस्कारः तमिलचलच्चित्रस्य थिरूचित्राम्बलम्-इत्यस्य निथ्या-मेनन-इत्यस्यै प्रदास्यते सहैव गुजराती-चलच्चित्रस्य कच्छएक्सप्रेसइत्यस्मै मानसीपारेखः अपि सर्वश्रेष्ठ-अभिनेत्र्याः पुरस्कारेण सम्मानिता। तत्रैव, सङ्गीतश्रेण्यां सर्वश्रेष्ठ-पुरूष-पार्श्वगायकस्य पुरस्कारः अरिजीत-सिंहइत्यस्मै उपायनीकृतः।

<u>नोबेल-पुरस्कारः</u>

भौतिक-विज्ञानाय ऐषमः नोबेल-पुरस्कारः जॉन एच. होपफील्ड अथ जेफ्री ई. हिंटन इत्येताभ्यां प्रदास्यते। आर्टिफिशियल न्युरल इत्यस्य माध्यमेन मशीन लर्निंग अर्थात् यान्त्रिकाधिगमं सक्षमं कर्तुं मूलभूतान्वीक्षणाय आविष्काराय च एतेभ्यः अयं पुरस्कारः प्रदास्यते। एतेभ्याम् आधुनिक समयस्य शक्तियुक्तस्य मशीन लर्निंग इति यान्त्रिकाधिगमस्य आधार-स्थापयित्रि विधियः विकसितुं भौतिकोपकरणानाम् उपयोगः कृतः।

## प्रधानमन्त्री वायुसेना दिवसः

प्रधानमन्त्री नरेन्द्रमोदी वायु-सेना-दिवसस्य अवसरे भारतीयवायुसेनायै शुभकामनाः प्रदत्तवान्। एकस्मिन् सामाजिक-सञ्चार-पटले श्रीमोदिना उक्तं यत् वायुसेना तस्याः पराक्रम-दक्षताभ्यां प्रशंस्यते। अथ च राष्ट्रस्य रक्षायां तस्याः भूमिका अत्यन्त-प्रशंसनीया अस्ति। प्रधानमन्त्री वायु-सेनायाः सफलताम् प्रकटयन् एकं दृश्य-श्रव्यपरं वीडियो अपि प्रकाशितम् । प्रोक्तं च यत् कथम् एकविंश्यां शताब्द्यां सर्वासु शक्तिशालि-सेनासु अन्यतमा संवृत्ता।

## प्रधानमन्त्री नवरात्र-पूजनम्

प्रधानमन्त्री नरेन्द्रमोदी नवरात्र-पर्वणः षष्ठे दिने मातुः कात्यायन्यात्र स्तुतिं कृतवान्। एकस्मिन् सामाजिक-सञ्चारपटले प्रधानमन्त्रिणा कामना कृता यत् मातुः आशीर्वादेन समेषां भक्तानां जीवने शक्तेः सामर्थ्यस्य पराक्रमस्य च सञ्चारः भवेत्।

## बङ्गाले त्यागपत्रम्

पश्चिम-बङ्गाले कोलकातायाः आर.जी.कर. चिकित्सा-महाविद्यालयस्य चिकित्सालयस्य च वरिष्ठ-सङ्काय-सदस्यैः अद्य सामूहिकं त्यागपत्रं प्रदत्तम् । इत्थं तैः कोलकातायाम् भूख-हड़ताल इति कार्य-स्थगने सहभागिनां कनिष्ठ-चिकित्सकानां समर्थने कृतम् ।

## महिला क्रिकेट स्पर्धा

महिला- विंशतिः प्रतिविंशतिः विश्वचषक-क्रिकेट्-क्रीडायाम् ऑस्ट्रेलिया-देशः अद्य सायङ्काले शारजाह-नगरे न्यूजीलैण्ड-देशेन सह क्रीडति। भारतीय-समयानुसारेण एषा स्पर्धा सायं सार्धं सप्तवादने आरप्स्यते। उभाभ्यां दलाभ्यां प्रतियोगितायाम् आरम्भिक-स्पर्धे विजिते।

## क्रिकेट्

भारत-बाङ्ग्लादेशयोः मध्ये अनुवर्तमानायाः विंशतिः प्रतिविंशतिः क्रिकेट-शृङ्खलायाः द्वितीया-स्पर्धा श्वः भविष्यति। दिल्लिस्थे अरुणजेटली-क्रिकेट्-क्रीडाङ्गणे एषा स्पर्धा भारतीय-समयानुसारेण सायं सप्तवादनात् आरप्स्यते।

।।इति वार्ताः।।